# भाषा शिक्षकस्य भूमिका

डॉ. सुनील कुमार शर्मा
सहायकाचार्य:,शिक्षापीठ:, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय, नवदेहली

**Article Info**

**Publication Issue :**
January-February-2023
Volume 6, Issue 1

**Page Number :** 146-149

**Article History**
Received : 01 Jan 2023
Published : 20 Jan 2023

**शोधसार**: (Abstract)-"श्लिष्टा क्रिया कस्यचिदात्मसंस्था, संक्रान्तिरन्यस्य विशेष युक्ता। यस्योभयं स हि साधु शिक्षकाणां, धुरि: प्रतिष्ठापयितव्य एव।।" मालविकाग्निमित्रनामके ग्रन्थे कालिदासेन स्पष्टमुल्लिखितं यत् य: शिक्षक: विषयवस्तुन: ज्ञानं सम्यक्तया धारयति एवञ्च यदि तस्य सम्प्रेषणकौशलं प्रभावि भवति, तर्हि स: साधु अर्थात् उत्तम: शिक्षक: भवति। अर्थात् शिक्षक: उभयतया निपुणं स्यात्। विषयवस्तुन: ज्ञानेन सह सम्प्रेषणकलामपि जानीयात्। भाषा शिक्षकस्य दायित्वमितोऽपि अधिकं भवति। स: यां भाषां पाठयति, तस्यां भाषायामपि पूर्णाधिकार: भवेत्। भाषा शिक्षक: कस्याऽपि भाषाया: भवेत्। हिन्दी- आंग्ल संस्कृत अथवा अन्यां कामपि भाषायां पाठयेत्, अन्याध्यापकानां अपेक्षया तस्य भूमिका विशिष्टा भवति। छात्राणां योग्यतानां क्षमतानां विकासेन सह तान् भाषाविषये दक्षमपि करणीयं भवति, येन स: समाजे, कस्मिन् अपि मञ्चे स्वीयवक्तव्यं स्पष्टतया कथयितुं शक्नुयात्। स्वीय लेखनीमाध्यमेन साहित्यस्य वर्धनं कुर्यात्। सर्वेषां भाषाध्यापकानां पाठनाय केचन सामान्य निर्देशा: भवन्ति, तेषां केचन गुणविशिष्टा: भवन्ति एवञ्च कक्षा कक्षे तेषां बहुनि करणीयानि कार्याणि भवन्ति, येन छात्रा: सुगमतया भाषाऽधिगमे तत्परा: भवन्ति। शोधपत्रेऽस्मिन् भाषा शिक्षकस्य भूमिका, तस्य गुणा:, तस्य विशिष्टकार्याणामुपरि चिन्तनं करिष्यते-

**मुख्यशब्दा:**-भाषा, छात्रा:, गुणा:, शिक्षक:, धुरि:, नियोजनम्, व्यवस्थापनम्, अग्रसरणम् , नियन्त्रणम्।

**विषय प्रवेश**: -आंग्ल भाषायामुक्तमस्ति - “A Teacher should be a friend, philosopher and guide.” अर्थात् शिक्षकेण कक्षायां तिसृणां भूमिकानां निर्वहनं करणीयं भवति - दार्शनिकस्य, निर्देशकस्य, मित्रस्य। दार्शनिकेन तात्पर्यमस्ति विषये स्वामित्वम् अर्थात् विषयाधिकार: शिक्षकस्य अवश्यमेव भवेत्। निर्देशकरूपेण तस्य कर्तव्यं भवति - छात्राणां समस्यानां क्लिष्टतानाञ्च निवारणम् एवं छात्राणां साहाय्यं शिक्षकेण मित्रवत् करणीयं येन छात्रा: भीता: न भवेयु:, सारल्येन विषयावगमने समर्था: स्यु:। आंग्लभाषायां शिक्षकस्य कृते पदद्वयं प्रयुक्तमस्ति- 'जॉनलैटिन' जॉन इति पदेन तात्पर्यं भवति -छात्र एवं लेटिन इति पदेन तात्पर्यं भवति विषयवस्तुन: ज्ञानम्। अर्थात् शिक्षकेन स्वीय छात्राणां विषये अधिकाधिकतया संज्ञानं भवेत् एवञ्च स्वीयविषयोपरि सम्पूर्णाधिकार: भवेत्। तदेव स: प्रभावशाली शिक्षक: भवितुर्महति। भाषाया: शिक्षकस्य कृते भाषाया: ज्ञानं, बोध:, कौशलञ्च एते त्रया: अंशा: आवश्यका: भवन्ति एवञ्च शिक्षकेभ्य व्याकरण-साहित्य-गद्य-पद्य-नाटक-कथादीनां सम्यक् ज्ञानं बोधश्च भवेत् सहैव सौन्दर्यानुभूते: रसानुभूते: समालोचनायाश्च योग्यता भवेत्।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

आधुनिककाले शिक्षकस्योत्तरदायित्त्वानि इतोऽपि वर्धमाना: जायन्ते। शिक्षकं 'व्यवस्थापकमपि' मन्यन्ते, यतोहि शिक्षणस्य योजना शिक्षकेणैव निर्मेया भवति यस्मिन् चतुर्णां सोपानानामनुसरणं करणीयं भवति–

(i) नियोजनम्

(ii) व्यवस्थापनम्

(iii) अग्रसरणम्

(iv) नियन्त्रणम्

शिक्षकस्य प्रभावशीलताया: आकलने केचन बिन्दवा: निरीक्ष्यन्ते। यथा–

(i) शिक्षकाणां योग्यता: क्षमताश्च सम्बन्धिता: मानका:।

(ii) कक्षायां शिक्षणस्य प्रभावशीलता एवं शाब्दिकाशाब्दिक अन्त:प्रक्रियया सम्बन्धिता: मानका:।

(iii) छात्राणां परीक्षापरिणाम: एवं छात्राणां शिक्षकेभ्य: अभिवृत्तिना सम्बन्धिता मानका:।

**भाषा शिक्षक:** – य: शिक्षक भाषां पाठयति, स: भाषा शिक्षक:। भाषायां शिक्षकस्य भूमिका महत्त्वपूर्णा भवति, येन स: पाठ्य–पुस्तकातिरिक्तं विविध सन्दर्भेषु भाषा–प्रयोगं महत्वं दद्यात्। भाषा शिक्षणे कक्षायां केचन बिन्दवा: आवश्यका:, यथा –

- भाषाया: कक्ष्यायां छात्रस्य कृते स्वीय वार्तां कथयितुम् अवसर: प्राप्येत्।
- ता: वार्ता: अध्यापकेन ध्यानेन श्रूयेत्।
- भाषाया: व्यावहारिकोपयोग: भवेत्, पाठ्यपुस्तकस्य सीमाया: बाध्यता नैव भवेत्।
- भाषाया: उपयोग: विभिन्न सन्दर्भेषु यथा कस्यापि घटनाया वर्णने क्रियेत चेत् भाषाशिक्षकेण छात्रा: अपि स्वीयानुभवान् कथनाय प्रोत्साहनीया:।
- भाषाशिक्षकेण पाठ्यपुस्तकेभ्य: साकं दृश्य–श्रव्य एवम् अन्य सहायकसामग्र्या: प्रयोग: अपि करणीयम्।

भाषा – शिक्षकस्य भूमिकायाम् अयं महत्त्वपूर्णमस्ति यत् स: पाठ्यपुस्तकस्य सीमात: स्वतन्त्रो भूत्वा विविध सन्दर्भेषु भाषा–प्रयोगं महत्त्वं दद्यात्। भाषाशिक्षां रुचिकरं कर्तुं शिक्षकस्य स्वीयाध्ययनमनुभवञ्च सहायकं भवति। अस्मिन् सन्दर्भे तस्य पार्श्वे यावत् ज्ञानं भविष्यति, स: तावत् सारल्येन विविध सन्दर्भेषु भाषाप्रयोगं कृत्वा छात्राणां सम्मुखे स्थापयितुं समर्थ: भविष्यति, अनेनाधिगम: तावदेव सरलं भविष्यति। एक: उत्तम: भाषा शिक्षक: धैयवान् भावुकञ्च भवति एवञ्च छात्रेभ्य: साकं सम्बन्धं स्थापयति। कदाचित् त्रुटी: अपि प्रोत्साहयन्ति, सक्रियाधिगमाय परिवेशं निर्माति, यत्र छात्रा: अपि योगदानं प्रयच्छन्ति।

**भाषाशिक्षके अनिवार्यतया एते स्यु:-**

(i) शुद्धोच्चारणम्

(ii) भाषाया: ज्ञानं कौशलानि च।

(iii) साहित्यस्य विविध विधानां ज्ञानं बोधश्च।

(iv) साहित्यं प्रति रुचे: अभिवृत्तेश्च सन्नद्धीकरणम्।

(v) यां भाषां पाठ्यन्ति, तां भाषां प्रति गौरवम् एवम् उत्तरदायित्त्वस्य भावना भवेत्, संवेदना भवेत्।

(vi) तद्भाषागत शिक्षणविधीनां ज्ञानं कौशलञ्च भवेत।

(vii) सहायकसामग्र्या: समुचितप्रयोगज्ञानं जानीयात्।

(viii) भाषा एवं साहित्यस्योद्देश्यानाम् एवं व्यावहारिकरूपस्य बोध:।

(ix) भाषा एवं साहित्य शिक्षणस्य मूल्यांकन विधीनां प्रविधीनाञ्च ज्ञानमुपयोगस्य क्षमता भवेत्।

(x) विषयस्य विस्तृत ज्ञानम्।
(xi) बालमनोविज्ञानस्य ज्ञानम्।

शिक्षकः शिक्षायाः क्रियान्वयनकर्ता भवति, अतः सः सर्वेभ्यः गुणेभ्यः परिपूर्णं भवेत्, येन सः शिक्षणप्रक्रियामुचितदिशां प्रवर्तेत। वस्तुतः तु शिक्षके सर्वे गुणाः भवेयुः, परन्तु भाषा शिक्षके एकं विशिष्टं गुणम् 'उच्चारणशुद्धता' अनिवार्यतया भवेत्।

शुद्धोच्चारणयुक्तः शिक्षकः एक छात्राणामुच्चारणसम्बन्धी अशुद्धीनां संशोधनं कर्तुं शक्नोति। अतः भाषा शिक्षकः यां भाषां पाठ्यति, तद्भाषागत सर्वासां ध्वनीनामुच्चारणस्थानानाञ्च ज्ञानमवश्यं भवेत्। तस्य भाषायां पर्याप्त रुचिर्भवेत्। सः धाराप्रवाहरूपेण तां भाषां भाषयितुं दक्षः भवेत्। लेखनमपि शुद्धं सरलं स्पष्टञ्च भवेत्। अनेन सहैव भाषा सम्बन्धीनां नवाचाराणां, नूतनोपागमानां, शिक्षणव्यूहानां, शिक्षणतकनीकीनाञ्च ज्ञानं भवेत्, येन भाषा शिक्षणमपि रुचिकरं भवेत्।

**भाषाशिक्षकस्य कार्याणि-** यथा वयं जानीमः प्रत्येकस्य विषयस्य काठिन्यस्तरं पृथक-पृथक भवति, तदनुसारेणैव कक्षाकक्षे तस्य कार्याणि निश्चीयन्ते, तथैव भाषाकक्षाकक्षेऽपि भाषाशिक्षकस्य कार्याणि एवं सन्ति –

- पाठनात् पूर्वं पाठ्यविषयस्य पूर्ण सज्जा।
- कक्ष्यायां सुचारू रूपेण पाठनम्।
- छात्रेभ्यः (यस्याः भाषायाः शिक्षकः अस्ति) भाषां प्रति रुच्योत्पादनम्, उत्साहवर्धनम् अभिप्रेरणञ्च।
- छात्रेभ्यः सम्मुखं मानक भाषायाः (मौखिक लिखितञ्च), आदर्शोपस्थापनम्।
- दृश्य-श्रव्योपकरणानां सदुपयोगकरणम्।
- छात्राणां लेखने रचनायाञ्च संशोधनीकरणम्।
- प्रत्येकं छात्रस्योपरि वैयक्तिकावधानेन सह वैयक्तिककाठिन्यानां निवारणम्।
- वाद-विवाद, भाषण, बाल-सभा इत्यादि पाठ्यसहगामिक्रियाणामायोजनम्।
- यथा काले छात्राणामुपलब्धीनां निरीक्षणं मूल्यांकनञ्च।
- यथाकाले शिक्षाप्रणाली पुनः परीक्षणम्।
- लक्षाणां निश्चितीकरणं, तद्नुसारं तकनीकीनां चयनम्।
- मानक भाषया सह व्यावहारिक भाषायाः ज्ञानप्रदानम्।
- सृजनात्मक गतिविधीनामायोजनं यथा-कथानिर्माणम्, श्लोकसंरचना, कवितालेखनमित्यादयाः।
- स्वतन्त्र लेखनायाभिप्रेरणम्
- नाटकानामभिमञ्चनं, कक्षाऽभिनयविधेः प्रयोगश्च। नाटकेन छात्राणां भाषायामुपरि सम्यक् अधिकारः भवति।
- संगीतात्मकप्रतिभानां प्रोत्साहनम्। तद्भाषागत गीतानां, कवितानां कक्ष्यायां मध्ये-मध्ये गानं कारणीयम्।
- विविध प्रतियोगितासु, पाठ्यसहगामि क्रियासु च भागग्रहणाय अभिप्रेरणम्।
- स्तरानुसार तस्यां भाषायां स्वतन्त्र भाषणाय, स्वतन्त्र लेखनाय चावसरकल्पनम्।
- उच्चस्तरे भाषा शिक्षकेण छात्रा सम्पादकीय कार्यार्थं, समाचार, आकाशवाणी वाचनायऽपि प्रेरणीयाः, कक्ष्यायामपि एतानि कर्तुमवसरः प्रदेयम्।

- उच्चस्तरे विविध विधानां समीक्षात्मक पाठनाय लेखनाय च छात्राः प्रेरणीयाः।
- भाषाविषयक शोधकार्यनिमित्तमपि अभिप्रेरणम्।

निष्कर्षः – कस्यामपि भाषायां प्रावीण्येन, असाधारणपठनेन, भाषणेन सह निश्चितरूपेण भाषाशिक्षकेण निश्चित् शब्दावल्याः समुचितोपयोगः एवं शब्दानामुपरि अधिकारोऽपि प्रदर्शनीयम्। कक्ष्यायां भाषाशिक्षकस्य विशिष्टा भूमिका भवति। तेन भाषाऽधिगमपरिवेशं निर्मातव्यम्। तां पाठनीयां भाषां प्रति छात्राणां रुच्योत्पादनीया। छात्रेभ्यः साकं मित्रवत् सम्बन्धं स्थापनीयम्, येन छात्राः निःसङ्कोचेन भाषायाः अभ्यासं कर्तुं शक्नुयात्। यदि तेषां पार्श्वे शब्दानामभावः भवति अथवा ते अशुद्धमुच्चाश्यन्ति, अशुद्ध वदन्ति, अशुद्ध लिखन्ति, तर्हि भाषा शिक्षकेण मित्रवत् परिष्कारः करणीयम् नोचेत छात्राः तस्यां भाषायां रुचिं नैव प्रदर्शयिष्यन्ति। सम्प्रति छात्राः यन्त्रेषु रुचिं प्रदर्शयन्ति, अतः भाषा शिक्षकेभ्यः लघुचलचित्राणां माध्यमेन तद् भाषागत कथानां, गीतानां, पाठानां प्रदर्शनमपि करणीयम्। येन छात्राः दर्शनेन सह श्रुत्वा भाषां सम्यक्तया अधिगच्छेयुः, रुचिञ्च वर्धयेयुः। एवं वक्तुं शक्नुमः शक्नुमः यत् भाषा शिक्षकस्य भूमिका अति विशिष्टा भवति।

**सन्दर्भग्रन्थसूची-**


1. चतुर्वेदी स्नेहलता, पाठ्यक्रम में भाषा, अग्रवाल पब्लिकेशन्स, आगरा, 2015/16
2. सिंह रामकिशोर, पाण्डेय रंजना, गुप्ता पी.के., पाठ्यक्रम में भाषा, आर. लाल बुक डिपो, 2017
3. सिंह अरुणा, भाषा एवं पाठ्यक्रम, स्वाति पब्लिकेशन्स, जयपुर, 2015
4. भटनागर ए.वी., भटनागर अनुराग, भटनागर नीरू, ज्ञान, भाषा एवं पाठ्यचर्या, आर. लाल बुक डिपो, मेरठ, 2016
5. राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद, भाषा शिक्षण, एन.सी.ई.आर.टी. कैंपस, श्री अरविन्द मार्ग, नई दिल्ली, 2017